# samAsasUtra sarvopakAriNI TIkA

# સમાસસૂત્ર સર્વોપકારિણી ટીકા

## Document Information

Text title : sarvopakAriNI sarvopakAriNI with TIkA

File name : sarvopakAriNI.itx

Category : major_works

Location : doc_z_misc_major_works

Transliterated by : Dhaval Patel drdhaval2785 at gmail.com

Proofread by : Dhaval Patel drdhaval2785 at gmail.com

Source : sAnkhyasaNgrahaH 1918

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

samAsasUtra sarvopakAriNI TIkA

# સમાસસૂત્ર સર્વોપકારિણી ટીકા

યદ્વાગ્વિભૂતિરમલાખિલતત્ત્વજાતા-
ન્નાનાદ્ય તત્ત્વમમલં પરિબોધયન્તી ।
શ્રેયઃ કરોતિ જગતાં ભગવન્તમાદ્યં
તં શ્રીમહર્ષિકપિલં પ્રભુમાનતોઽસ્મિ ॥ ૧॥

ઉદ્દિધીર્ષુસ્તદુન્નીતસૂત્રતત્ત્વાર્થબુદ્ધયે ।
સર્વોપકારિણીં કુર્વે ટીકાં ગુણવશંવદઃ ॥ ૨॥

અથાત્રાનાદિક્લેશકર્મવાસનાસમુદ્રનિપતિતાનનાથદીનાનુદ્દિધીર્ષુઃ પરમકૃપાલુઃ સ્વતઃસિદ્ધતત્ત્વજ્ઞાનો મહર્ષિર્ભગવાન્ કપિલો દ્વાવિંશતિસૂત્રાણ્યુપાદિક્ષત્ । સૂચનાત્ સૂત્રમિતિ હિ વ્યુત્પત્તિઃ । તત એતૈઃ સમસ્તતત્ત્વાનાં સકલષષ્ટિતન્ત્રાર્થાનાં ચ સૂચનં ભવતિ । ઇતશ્ચેદં સકલસાંખ્યતીર્થમૂલભૂતં તીર્થાન્તરાણિ ચૈતત્પ્રપઞ્ચભૂતાન્યેવ । સૂત્રષડધ્યાયી તુ વૈશ્વાનરાવતારમહર્ષિભગવત્કપિલપ્રણીતા ઇયં તુ દ્વાવિંશતિસૂત્રી તસ્યા અપિ બીજભૂતા નારાયણાવતારમહર્ષિભગવત્કપિલપ્રણીતેતિ વૃદ્ધાઃ । તત્રાદૌ પ્રથમસૂત્રત્રયેણ સકલપ્રપઞ્ચમૂલભૂતાનિ પઞ્ચવિંશતિતત્ત્વાનિ સૂચયતિ । અષ્ટૌ પ્રકૃતયઃ ॥ ૧ ॥

ષોડશ વિકારાઃ ॥ ૨ ॥ પુરુષઃ ॥ ૩ ॥ અયમર્થઃ સાંખ્યસિદ્ધાન્તે પઞ્ચવિંશતિસ્તત્ત્વાનિ । તત્ર મૂલપ્રકૃતિઃ મહત્તત્ત્વમ્ અહઙ્કારઃ શબ્દતન્માત્રા સ્પર્શતન્માત્રા રૂપતન્માત્રા રસતન્માત્રા ગન્ધતન્માત્રા ચેત્યષ્ટૌ પ્રકૃતયઃ સન્તિ । અત્ર તત્ત્વાન્તરારમ્ભકત્વં પ્રકૃતિત્વમ્ અતશ્ચ મહદાદીનાં સપ્તાનાં પૂર્વપૂર્વવિકૃતિત્વેઽપિ ન અતિઃ લક્ષણસમન્વયાત્ । પઞ્ચ બુદ્ધીન્દ્રિયાણિ પઞ્ચ કર્મેન્દ્રિયાણિ મનઃ ગગનપવનજ્વલનસલિલધરણ્યાખ્યાનિ પઞ્ચ ભૂતાનિ ચૈતાનિ ષોડશ વિકારાઃ વિકૃતય એવ ન તત્ત્વાન્તારારમ્ભકાણિ સર્વં વાક્યં

સાવધારણમિતિ ન્યાયાત્ । પુરુષઃ પઞ્ચવિંશતિતમં તત્ત્વમ્ । અયં ચ ન પ્રકૃતિર્ન વિકૃતિઃ તાભ્યઃ પૃથક્કૃત્ય નિરૂપણાત્ । અનેન જડત્વપરિણામિત્વકર્તૃત્વાદિધર્મવદ્ભ્યઃ પ્રકૃત્યાદિભ્યઃ પુરુષસ્ય વૈલક્ષણ્યમપિ સૂચિતં ભવતિ તથા ચ કારિકા ।
મૂલપ્રકૃતિરવિકૃતિર્મહદાદ્યાઃ પ્રકૃતિવિકૃતયઃ સપ્ત ।
ષોડશકસ્તુ વિકારો ન પ્રકૃતિર્ન વિકૃતિઃ પુરુષઃ ॥ ઇતિ ।
નન્વેતેભ્યોઽતિરિક્તા અન્યેઽપિ બહવો ઘટપટાદયઃ પદાર્થા દૃશ્યન્તે તત્કથમેષામુપપત્તિરત આહ ।
ત્રૈગુણ્યસઞ્ચારઃ ॥ ૪ ॥ ત્રિગુણ એવ ત્રૈગુણ્યં સત્ત્વરજસ્તમાંસિ તેષાં સઞ્ચારઃ મત્તકપોતકણ્ઠન્યાયેન પ્રતિક્ષણં વિલક્ષણપરિણામો વર્ત્તત ઇતિ શેષઃ । અનેન મૂલપ્રકૃતિસ્ત્રિગુણાત્મિકા ત્રિત્વેન ચ ભેદબોધકેન ગુણાઃ પરસ્પરવિરુદ્ધસ્વભાવાઃ પ્રીત્યપ્રીતિવિષાદાત્મકાઃ સઞ્ચારેણ ચ સઙ્ગતસમ્યક્ચરણાર્થકેન તેષાં નિત્યસભાવઃ પુરુષાર્થે જનનીયે કાર્યાનુસારેણ પરસ્પરસહાયતા ચ । તતશ્ચ પ્રકૃતેર્મહદાદીનાં ભૂતેભ્યશ્ચ ઘટપટાદિસકલપદાર્થાનાં ત્રિગુણલક્ષણપરિણામાદેવ સંસિદ્ધિઃ કાર્યોત્પાદશ્ચ નાપૂર્વઃ કિન્ત્વાવિર્ભાવમાત્રં સૂક્ષ્મકારણરૂપેણ સ્થિતસ્ય સ્થૂલકાર્યક્ષમરૂપેણ વિપરિણામ ઇતિ સદ્વ્યાપ્તિવાદશ્ચ ઇત્યેતે સિદ્ધાન્તાઃ સંસૂચિતા ભવન્તીતિ બોધ્યમ્ ॥

નનુ ગુણાનામનવરતપરિણતિસ્વભાવત્વાત્ કદાચિદપિ દૃશ્યજાતાદર્શનં ન સ્યાત્ તતશ્ચ પ્રલયોચ્છેદઃ સ્યાદત આહ । પ્રતિસઞ્ચરઃ ॥ ૫ ॥ યથા સૃષ્ટિપ્રક્રિયાનિર્વાહકસ્ત્રિગુણપરિણમસ્તથા પ્રતિસઞ્ચારઃ પ્રતિકૂલોપિ વિપરિણામોસ્તિ તથા ચ પ્રતિલોમપરિણામેન તત્તત્કાર્યાણાં સ્વસ્વકારણે લયે જાતે ત્રિગુણાયાઃ પ્રકૃતેઃ સામ્યસ્થિતિરેવ પ્રલય ઇતિ સૂચિતમ્ । તદા ચ સમાનપરિણામત્વેન વૈલક્ષણ્યાનાવિર્ભાવ ઇતિ ભાવઃ ॥

અથ જાયમાનસ્ય સુખદુઃખાદેર્વિવેકાર્થં ત્રૈવિધ્યં વક્તુમેકેનાદાવાન્તરમાહ । અધ્યાત્મમ્ ॥ ૬ ॥ આત્માનમધિકૃત્યેત્યધ્યાત્મમ્ તદ્વિવિધં શારીરં માનસં ચેતિ શારીરં વાતપિત્તશ્લેષ્મવૈષમ્યનિમિત્તં માનસં કામક્રોધલોભમોહેર્ષ્યાવિષયવિશેષદર્શનાદર્શનનિમિત્તમ્ । એતદુભયમપિ આન્તરોપાયસાધ્યત્વાદધ્યાત્મમિત્યુચ્યતે ॥

બાહ્યભેદદ્વયમાહ દ્વાભ્યામ્ । અધિભૂતમ્ ॥ ૭ ॥ માનુષપશુપક્ષિસરીસૃપસ્થાવરાદિભૂતાન્યધિકૃત્ય

તદધિભૂતમિત્યર્થઃ ॥

આધિદૈવમ્ ॥ ૮ ॥ યક્ષરાક્ષસવિનાયકગ્રહાદ્યાવેશનિમિત્તમેતત્ । ઇદં દ્વયમપિ બાહ્યોપાયસાધ્યત્વાદ્બાહ્યમિત્યુક્તમ્ ॥

નનુ સત્સ્વપિ વિલક્ષણેષુ બહુષુ પદાર્થેષુ પુરુષસ્ય તત્સમ્બન્ધાભાવાત્ કથં તતો દુઃખમતસ્તત્સામગ્રીં નિરૂપયિષુરાદૌ બુદ્ધીન્દ્રિયાણ્યાહ । પઞ્ચાભિબુદ્ધયઃ ॥ ૯ ॥

અભિતો બુદ્ધ્યન્તે જ્ઞાયન્તે વસ્તૂન્યાભિરિત્યભિબુદ્ધયઃ બુદ્ધીન્દ્રિયાણિ ચક્ષુઃશ્રોત્રઘ્રાણરસનત્વગાખ્યાનિ રૂપશબ્દગન્ધરસસ્પર્શબોધકાનિ ॥

અનેન ચ જ્ઞાનદ્વારા યોગં દર્શયિતું કર્મેન્દ્રિયાણ્યાહ । પઞ્ચ કર્મયોનયઃ ॥ ૧૦ ॥ પઞ્ચ ઇન્દ્રિયાણિ કર્મયોનયઃ કર્મણાં વચનાદાનવિહરણોત્સર્ગાનન્દાનાં યોનયઃ કારણાનિ તાનિ ચ વાક્પાણિપાદપાયૂપસ્થાખ્યાનિ । અનેન કર્મણા તત્તદ્વિષયસાન્નિધ્યેન તત્તત્સમ્બન્ધઃ સૂચિતઃ ॥

અથ મહદહઙ્કારમનસામધ્યવસાયાભિમાનસઙ્કલ્પા અસાધારણ્યો વૃત્તયઃ તાભિર્વિનેન્દ્રિયદ્વારા વિષયગ્રહાસમ્ભવાત્ તૈસ્તદ્ગ્રહોક્ત્યા તાસાં નિરૂપિતપ્રાયત્વેન તત્સાધારણી વૃત્તિરાહ । પઞ્ચ વાયવઃ ॥ ૧૧ ॥ પઞ્ચસંખ્યાકાઃ પ્રાણાપાનસમાનોદાનવ્યાનાખ્યાઃ વાયવઃ મહદહઙ્કારમનસાં સાધારણવૃત્તયઃ જીવનસાધનાનિ । તત્ર પ્રાણો નાસાગ્રહૃન્નાભિપાદાઙ્ગુષ્ઠવૃત્તિઃ અપાનઃ કૃકાટિકાપૃષ્ઠપાયુપાર્શ્વોપસ્થવૃત્તિઃ સમાનો હૃન્નાભિસર્વસન્ધિવૃત્તિઃ ઉદાનો હૃત્કણ્ઠતાલુમૂર્દ્ધભ્રૂમધ્યવૃત્તિઃ વ્યાનસ્ત્વવૃત્તિરિતિ ॥

પઞ્ચાનમૌપયોગમાહ । પઞ્ચ કર્માત્માનઃ ॥ ૧૨ ॥

ભુક્તપીતાહારજલાદેરસરુધિરાદેશ્ચ યથાયથં પ્રાપણમેષાં કર્મ તદેકાનુમેયત્વેન તત્સ્વરૂપાત્મકતા (?) ઇત્યર્થઃ ॥ ૧૨ ॥

નન્વસ્તુ જ્ઞાનક્રિયાદ્વારા મહદભિમાનસર્વસઙ્કલ્પાનાં વિષયયોગિત્વં પુરુષસ્ય સ્વપરિણામિતયા તન્ન ઘટતે ઇત્યાશઙ્કાં વિનિવર્તયિષુરાહ । પઞ્ચપર્વાવિદ્યા ॥ ૧૩ ॥ અનાત્મસ્વાત્મખ્યાતિરવિદ્યા સા ચ વિદ્યાવિરોધિની પઞ્ચપર્વા ભવતિ તાનિ ચ પર્વાણિ

અવિદ્યાસ્મિતારાગદ્વેષાભિનિવેશાખ્યાનિ । તથા ચ યદવિદ્યયા વિપર્યયેણાવધાર્યતે વસ્તુ અસ્મિતાદયસ્તત્સ્વભાવાસ્તદભિનિવિશન્તે તતશ્ચાત્મનો વિવેકેન તત્સમ્બન્ધ ઇતિ ભાવઃ ॥ ૧૩ ॥

પઞ્ચાશદ્ભેદેશુ પ્રત્યયસર્ગેષુ પઞ્ચવિપર્યયા નિરૂપિતાઃ અધુના વિશિષ્ટેષ્વષ્ટાવિંશતિમશક્તિમાહ । અષ્ટાવિંશતિધાऽશક્તિઃ ॥ ૧૪ ॥

ઇન્દ્રિયવધા એકાદશ વુદ્ધિવધાશ્ચ સપ્તદશ ઇત્યેતાઃ અશક્તય ઉચ્યન્તે ।
ઇન્દ્રિયવધા યથા ।
બાધિર્યં કુષ્ઠતાऽન્ધત્વં જડતાऽજિઘ્રતા તથા ।
મૂકતાકૌણ્યપઙ્ગુત્વક્લૈબ્યોદાવર્તમન્દતાઃ । ઇતિ
બુદ્ધિવધાસ્તુ નવતુષ્ટીનામષ્ટસિદ્ધીનાં ચ વિપર્યયાદ્ભવન્તિ તદિત્થં જાતા અશક્તયોऽષ્ટાવિંશતિધેતિ ॥ ૧૪ ॥

પ્રસક્તે તુષ્ટિસિદ્ધી એવાહ દ્વાભ્યામ્ । નવધા તુષ્ટિઃ ॥ ૧૫ ॥ યથોક્તમ્ ।
આધ્યાત્મિક્યશ્ચતસ્રઃ પ્રકૃત્યુપાદાનકાલભાગ્યાખ્યાઃ ।
બાહ્યાઃ વિષયોપરમાત્ પઞ્ચ નવ તુષ્ટયોભિહિતાઃ ॥ ઇતિ
અસ્યાર્થઃ વિવેકસાક્ષાત્કારો હિ પ્રકૃતિપરિણામભેદઃ તં ચ સૈવ કરોતીતિ કૃતં ધ્યાનાભ્યાસેનેતિ કેનચિદુપદિષ્ટે તત્ર તુષ્ટિઃ પ્રકૃત્યાખ્યા ૧, અથ પ્રકૃતેઃ સર્વાન્ પ્રત્યવિશેષાન્ન કેવલં તત એવ વિવેકસાક્ષાત્કારઃ કિન્તુ પ્રવ્રજ્યયેત્યુપદિષ્ટે તુષ્ટિરુપાદાનાખ્યા ૨, પ્રવ્રજ્યાપિ કાલવિશેષણાદરેણૈવ વિવેકં જનયત્યલમુત્તપ્તતયા ઇત્યુપદિષ્ટે તુષ્ટિઃ કાલાખ્યા ૩, ભાગ્યેનૈવ વિવેકખ્યાતિરિતિ તુષ્ટિર્ભાગ્યાખ્યા ૪, ઇત્યેતાશ્ચતસ્રઃ પ્રકૃતિવ્યતિરિક્તમાત્માનમધિકૃત્ય જાયન્ત ઇત્યાધ્યાત્મિક્ય ઉચ્યન્તે । વિષયાઃ શબ્દસ્પર્શરૂપરસગન્ધાખ્યાઃ પઞ્ચ તેષુ અર્જનરક્ષણક્ષયભોગહિંસાદોષદર્શનં તત ઉપરમા વિરતયોऽપિ પઞ્ચ તે ચ મહદહઙ્કારાદીનનાત્મન આત્મનોભિમન્યમાનસ્ય વૈરાગ્યે સત્યુત્પદ્યન્તેऽતો બાહ્યા ઉચ્યન્તે । ઇમાશ્ચ નવ ઉક્તવિપર્યયાઃ ૫ અશક્તિભિઃ ૨૮ સહ દ્વિચત્વારિંશત્ ૪૨ સિદ્ધિપરિપન્થિત્વાદ્ધેયાઃ ॥ ૧૫ ॥

અષ્ટધાસિદ્ધિઃ ॥ ૧૬ ॥ તદ્યથા
ઊહઃ શબ્દોધ્યયનં ૩ દુઃખવિઘાતાસ્ત્રયઃ ૬ સુહૃત્પ્રાપ્તિઃ ૭
દાનઞ્ચ ૮ સિદ્ધયોષ્ટાવિતિ તત્રોપદેશમન્તરેણ તત્ત્વજ્ઞાનસ્ય સ્વયમૂહાદ્યા અસિદ્ધિઃ સા પ્રથમા ૧ અન્યદીયશાસ્ત્રપાઠમાકર્ણ્ય

જ્ઞાનોત્પત્તૌ શબ્દાખ્યા દ્વિતીયા ૨ અધ્યયનતસ્તત્ત્વજ્ઞાને તૃતીયા ૩ આધ્યાત્મિકાધિદૈવિકાધિભૌતિકદુઃખત્રયવિઘાતેન તત્ત્વજ્ઞાને જાતે સિદ્ધિત્રયમ્ ૬ જ્ઞાનવત્સુહૃદો લાભેન તત્ત્વજ્ઞાને સુહૃત્પ્રાપ્ત્યાખ્યા સપ્તમી ૭ ધનાદિનારાધિતે જ્ઞાનિનિ તત્ત્વજ્ઞાનેઽષ્ટમી ૮ અત્ર દુઃખવિઘાતરૂપાણાં તિસૃણાં સિદ્ધીનાં મુખ્યત્વમિતરાસાં તદુપાયત્વાદ્ગૌણત્વં બોભ્યમ્ । પઞ્ચવિપર્યયાદારભ્યાષ્ટસિદ્ધિપર્યન્તમેતે પ્રત્યયસર્ગાઃ તેષુ પ્રકૃતિપ્રત્યયાન્યતાખ્યાતિપ્રેપ્સુભિર્દ્વિચત્વારિંશદાદિતો હેયાઃ સિદ્ધયસ્તુ ઉપાદેયા ઇતિ તત્સ્વરૂપવ્યાક્રિયયૈવ સૂચિતં ભવતિ ॥ ૧૬॥

પ્રત્યયસર્ગમભિધાય પ્રકૃતિસર્ગમાહ । દશ મૂલિકાર્થાઃ ॥ ૧૭ ॥ દશ અર્થાઃ પદાર્થાઃ મૂલિકાઃ સન્તિ મૂલં પ્રકૃતિઃ પુરુષશ્ચ તાવાશ્રયત્વેન વિદ્યેતે યેષામ્ અથવા મૂલં સ્વભાવઃ સ પ્રયોજકત્વેનાસ્તિ યેષામિતિ મૂલિકા મૂલપ્રકૃતૌ પુરુષે ચ વિદ્યમાના ઇતિ યાવત્ તથા ચ રાજવાર્ત્તિકમ્ ।
પ્રધાનાસ્તિત્વમેકત્વમર્થવત્ત્વમથાન્યતા ।
પારાર્થ્યં ચ તથા નૈક્યં વિયોગો યોગ એવ ચ ॥

શેષવૃત્તિરકર્તૃત્વં મૌલિકાર્થાઃ સ્મૃતા દશ ॥

અત્રૈકત્વમર્થવત્ત્વં પારાર્થ્યં પ્રધાને અન્યત્વં પ્રકૃત્યપેક્ષયા અકર્તૃત્વં બહુત્વં પુરુષે અસ્તિત્વં યોગો વિયોગશ્ચોભયોઃ । શેષવૃત્તિઃ અઙ્ગાઙ્ગિભાવેન ગુણાનાં વૃત્તિઃ સ્થૂલસૂક્ષ્મશરીરયોરિતિ । અત્ર પ્રકૃતિપુરુષયોઃ સાધર્મ્યવૈધર્મ્યનિરૂપણેન દ્વયોઃ પાર્થક્યેન જ્ઞાનં પ્રકૃતિપુરુષાન્યતાખ્યાતિબીજમિતિ સૂચિતં ભવતિ । તથા ચૈતેષાં ધર્માણાં તત્તત્સ્વભાવભૂતત્વેન પ્રકૃતિસર્ગતાવ્યવહાર ઇતિ ॥ ૧૭॥

નનુ બુદ્ધ્યાદિભિરેવ ત્રિગુણાત્મકૈઃ સકલકાર્યસિદ્ધૌ કિમધિકપ્રકૃત્યઙ્ગીકારેણ અત આહ । અનુગ્રહસર્ગઃ ॥ ૧૮ ॥ બુદ્ધ્યાદિભિઃ સ્વકાર્યેઽહઙ્કારાદૌ જનયિતવ્યે પ્રકૃતેરનુગ્રહસહાયોપેક્ષ્યતે અન્યથા બુદ્ધિઃ ક્ષીણા સતી નાલમહઙ્કારં જનયિતુમિતિ સકલોપિ સર્ગસ્તદનુગ્રહમૂલક એવેત્યર્થઃ । અયમેવ પ્રકૃત્યાપૂર ઇત્યુચ્યતે તથા ચ પ્રકૃત્યૈવાયં સર્ગો નેશ્વરેણ નાપિ બ્રહ્મોપાદાનો નાપ્યકારણો નેશ્વરાધિષ્ઠિતપ્રકૃતિત ઇતિ સૂચ્યતે ॥ ૧૮॥

તન્માત્રસર્ગમાહ । ચતુર્દશવિધો ભૂતસર્ગઃ

॥ ૧૯ ॥ દેવતૈર્યગ્યોનમાનુષ્યભેદેન ભૂતસર્ગશ્ચતુર્દશપ્રકારકો ભવતિ । તચ્ચેત્થમ્ બ્રાહ્મપ્રાજાપત્યૈન્દ્રપૈત્રગાન્ધર્વયાક્ષરાક્ષસપૈશાચભેદેનાષ્ટવિધો દૈવઃ પશુમૃગપક્ષિસ્થાવરસરીસૃપભેદેન પઞ્ચવિધસ્તૈર્યગ્યોન એકવિધો માનુષ્ય ઇતિ ॥ ૧૯॥

નનુ પુરુષાર્થશિરોમણીભૂતમોક્ષતત્ત્વાકાઙ્ક્ષા સતિ બન્ધસ્વરૂપજ્ઞાન એવોપપદ્યતેઽતો બન્ધાનેવાહ । ત્રિવિધો બન્ધઃ ॥ ૨૦ ॥ વિપર્યયાદતત્ત્વજ્ઞાનાજ્જાયમાનો બન્ધસ્ત્રિવિધઃ । પ્રાકૃતો વૈકૃતો દાક્ષિણશ્ચેતિ । તત્ર પુરુષધિયા પ્રકૃત્યુપાસનં પ્રાકૃતો બન્ધઃ । તથા ભૂતેન્દ્રિયાહઙ્કારબુદ્ધ્યુપાસનં વૈકૃતઃ પુરુષતત્ત્વમજાનતઃ કેવલમિષ્ટાપૂર્તકારિણો દાક્ષિણ ઇતિ ત્રયાણામિતિ પુરુષસ્વરૂપવેદકત્વાભાવે બન્ધકત્વમ્ ॥ ૨૦॥

નન્વેતદજ્ઞાનત્રયનિવૃત્તૌ કીદૃશો મોક્ષો જાયત ઇત્યાહ । ત્રિવિધો મોક્ષઃ ॥ ૨૧ ॥ ઇષ્ટાપૂર્તાદિકર્મસ્વસારતાં પુરુષસ્વરૂપોપલબ્ધેરેવ સારતાં બુદ્ધ્યમાનસ્ય પ્રથમઃ તતો ભૂતેન્દ્રિયાદિષ્વપિ વિકારતાં તતઃ પૃથગાત્માનં જાનતઃ પ્રકૃતિરૂપસ્તૃતીયઃ । યદ્યપિ પ્રથમદ્વિતીયૌ ન તાત્ત્વિકમોક્ષૌ તથાપ્યૈકદેશિકાન્યતાખ્યત્યા તાવદ્બન્ધાપગમેન મોક્ષત્વવ્યવહાર ઇતિ દ્રષ્ટવ્યમ્ । અત્ર બન્ધમોક્ષસંસારાઃ પ્રકૃતાવેવ ન પુરુષે સવાસનક્લેશકર્માશયાનામપરિણામિનિ પુરુષેઽસમ્ભવાત્ તથા ચ ભૃત્યજયપરાજયયોઃ સ્વામિન્યુપચારાત્ પ્રકૃતિગતાનાં બન્ધાદીનાં પુરુષે ઉપચાર એવ ભોગાપવર્ગયોઃ પ્રકૃતિગતયોરપિ વિવેકાગ્રહાત્ પુરુષસમ્બન્ધઃ સુસાધિતો ભવતિ । એવં ચ ધર્મજ્ઞાનાજ્ઞાનવૈરાગ્યાવૈરાગ્યૈશ્વર્યાનૈશ્વર્યૈઃ સપ્તભી રૂપૈઃ પ્રકૃતિર્ભોગાપવર્ગરૂપપુરુષાર્થં પ્રત્યાત્માનં બધ્નાતિ તત્ત્વજ્ઞાનેન વિવેકખ્યાત્યા એકેન રૂપેણ વિમોચયતિ ઇતીદૃશસ્ય તત્ત્વજ્ઞાનસ્યાભ્યાસાદાદરનૈરન્તર્યદીર્ઘકાલસેવિતાત્ સત્ત્વપુરુષાન્યતાસાક્ષાત્કારિ કેવલં જ્ઞાનમુત્પદ્યતે તેનાનાદિરપિ વિપર્યયવાસના પ્રતિબધ્યતે તતશ્ચાધ્યવસાયાભિમાનસઙ્કલ્પાલોચનાનિ અન્તરાણિ બાહ્યાશ્ચ સર્વે વ્યાપારા આત્મનિ પ્રતિષિદ્ધા ભવન્તિ અયમેવ મોક્ષ ઇતિ સિદ્ધાન્તઃ ॥ ૨૧॥

નનુ પુરુષપ્રકૃત્યાદીનામલક્ષ્યાણાં લક્ષ્યાણાં ચ

ઘટપટાદીનામખિલપ્રમેયાણાં લૌકિકૈઃ કથમનુભવો વિધેયોઽત
આહ । ત્રિવિધં પ્રમાણમ્ ॥ ૨૨ ॥ અસન્દિગ્ધાવિપરીતાનધિગતવિષયા
ચિત્તવૃત્તિર્બોધશ્ચ પૌરુષેયઃ ફલં પ્રમા તસ્યાઃ કરણં પ્રમાણમ્ ।
તત્ ત્રિવિધં પ્રત્યક્ષાનુમાનશબ્દભેદાત્ । એતેનાધિકાન્યુપમાનાદીનિ
નૈયાયિકાદ્યભ્યુપગતાનિ પ્રમાણાનિ એષ્વેવાન્તર્ભવન્તીતિ
નાતિરિક્તાન્યુપયુજ્યન્તે । તત્રાર્થસન્નિકૃષ્ટમિન્દ્રિયં પ્રત્યક્ષમ્ ।
વ્યાપ્યવ્યાપકભાવપક્ષધર્મતાજ્ઞાનપૂર્વકમનુમાનમ્ ।
આપ્તવચનાદ્વેદાદિરૂપાચ્છબ્દમિતિ । વિશેષત એષાં
લક્ષણોદાહરણાન્યાકરાદવસેયાનીતિ શિવમ્ ॥ ૨૨ ॥

એકસ્મિંસ્ત્રિગુણાત્મતત્ત્વયુતિતો જાતા દ્વિધા સાખ્યતો
દ્વિત્વં પ્રાપ્ય પ્રકાશયત્યવિરતં ભોગાપવર્ગૌ સ્વતઃ ।
ઇત્યેવં પરિસૂચયન્ મતિમતાં મોહાપહં કાપિલં
સૂત્રાણામમલં દ્વિકદ્વયમિદં જીયાચ્ચિરં ચેતસિ ॥

ઇતિ સર્વોપકારિણી સંક્ષિપ્તકાપિલસૂત્રવૃત્તિઃ સમાપ્તા ॥

Encoded and proofread by Dhaval Patel drdhaval2785 at gmail.com

---

*samAsasUtra sarvopakAriNI TIkA*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*